कपालः, पु क्ली, (कं मस्तकं पालयतीति । क + पालि + अण् । यद्वा कम्प्यते यः । कपि चलने + "तमिविशिविडिमृणिकुलिकपिपलिपञ्चिभ्यः कालन्" । उणां १ । ११७ । इति कालन् । कपिनिर्देशाद् नलोपः ।) शिरोऽस्थि । माथार खुलि इति भाषा । तत्पर्य्यायः । कर्परः इत्यमरः । २ । ६ । ६८ ॥
(यथाह याज्ञवल्क्यः । ३ । ९० ।
"द्वौ शङ्खौ कपालानि चत्वारि शिरसस्तथा" ॥)
घटादेः खण्डम् । खापरा खोला इत्यादि भाषा ॥
(यथा, भाषापरिच्छेदे । ११ ।
"घटादीनां कपालादौ द्रव्येषु गुणकर्म्मणोः ।
तेषु जातेश्च सम्बन्धः समवायः प्रकीर्त्तितः" ॥)
समूहः । इति मेदिनी ॥ (मृण्मयकर्परादिभिक्षापात्रम् । यथा, मनुः । ६ । ४४ ।
"कपालं वृक्षमूलानि कुचैलमसहायता ।
समता चैव सर्व्वस्मिन्नेतन्मुक्तस्य लक्षणम्" ॥)
पुरोडाशः । यथा शतपथब्राह्मणे ।
"कपालानि चोपदधाति पुरोडाशं चाधिश्रयति" ॥)
कुष्ठरोगविशेषः । इति हेमचन्द्रः ॥ तस्य लक्षणम् । यथा, माधवकरः ॥
"कृष्णारुणकपालाभं यद्रूक्षं परुषं तनु ।
कापालं तोदबहुलं तत्कुष्ठं विषमं स्मृतम्" ॥

कपालनालिका, स्त्री, (कपालस्य सूत्रसंघस्य नालिका ।) तर्कुः । इति त्रिकाण्डशेषः ॥ टेको इति भाषा ॥

कपालभृत्, पुं, (कपालं भिक्षापात्रं ब्रह्मकपालं वा बिभर्त्ति धारयति । कपाल + भृ + क्विप् तुक् च ।) शिवः । इत्यमरः । १ । १ । ३४ ॥

कपालिका, स्त्री, (कपाल + कन् + टाप् ।) दन्तरोगविशेषः । तस्य लक्षणम् ।
"कपालेष्विव दीर्य्यत्सु दन्तानां सैव शर्करा ।
कपालिकेति पठिता सदा दन्तविनाशिनी" ॥
इति माधवकरः ॥ तस्याश्चिकित्सा दन्तरोगशब्दे द्रष्टव्या ॥ (घटकपालिका । यथा, विष्णुपुराणे । २ । १२ । ४१ ।
"मही घटत्वं घटतः कपालिका
कपालिकाचूर्णरजस्ततोऽणुः ।
जनैः स्वकर्म्मस्तिमितात्मनिश्चयै-
रालक्ष्यते ब्रूहि किमत्र वस्तु" ॥)

कपालिनी, स्त्री, (कपालोऽस्त्यस्याः । कपाल + इनि + स्त्रियां ङीप् ।) दुर्गा । इति हेमचन्द्रः ॥

कपाली, [न्] पुं, (कपालोऽस्त्यस्य । कपाल + इनिः ।) महादेवः । इति हलायुधः ॥ स्वनामख्यातजातिविशेषः । स तु ब्राह्मणकन्यायां तीवराज्जातः । इति पराशरपद्धतिः ॥ (त्रि, कपालविशिष्टः । यथा, कुमारे । ५ । ७८ ।
"कपालि वा स्यादथवेन्दुशेखरं
न विश्वमूर्त्तेरवधार्य्यते वपुः" ॥
"नटी कपालिनी वेश्या कुलटा नापिताङ्गना" ॥
इति च तन्त्रम् ॥ योगिविशेषः । यथा, हठयोगदीपिकायां १ । ७ ।
"कपाली बिन्दुनाथश्च काकचण्डीश्वराह्वयः" ॥)

कपिः, पुं, (कम्प्यते यः सदा । कपि चलने । "कुण्डिकम्प्योर्नलोपश्च" उणां । ४ । १४३ । इ प्रत्ययः ।) वानरः । इत्यमरः । २ । ५ । ३ ॥
(यथा, मनुः । ११ । १५४ ॥
"विड्वराहखरोष्ट्राणां गोमायोः कपिकाकयोः ।
प्राश्य मूत्रपुरीषाणि द्विजश्चान्द्रायणं चरेत्" ॥)
सिह्लकः । मधुसूदनः । इति मेदिनी ॥ (यथा, महाभारते १३ । १४९ । १०९ ।
"सनात्सनातनतमः कपिलः कपिरव्ययः" ॥)
धात्रिका । इति शब्दमाला ॥ करञ्जभेदः । इति शब्दचन्द्रिका ॥ (कादुदकात् पृथ्वीं पाति इति । वराहः । रक्तचन्दनम् । पिङ्गलम् । तद्वर्णवति त्रि ॥)

कपिकच्छुः, स्त्री, (कपीनामपि कच्छुर्यस्याः कण्डूहेतुत्वात् ।) वृक्षविशेषः । आलकुशी इति भाषा । केवाँच इति हिन्दीभाषा । तत्पर्य्यायः । आत्मगुप्ता २ जडा ३ अव्यण्डा ४ कण्डुरा ५ प्रावृषायणी ६ ऋष्यप्रोक्ता ७ शूकशिम्बिः ८ मर्कटी ९ । इत्यमरः ।२।४।८७॥ स्वगुप्ता १० अजडा ११ कण्डुरा १२ प्रावृषायिणी १३ प्रावृषा १४ शूकशिम्बी १५ शूकशिम्बा १६ कपिकच्छूः १७ । इति भरतः ॥ स्वयंगुप्ता १८ महर्षभी १९ लाङ्गली २० कुण्डली २१ चण्डा २२ दुरभिग्रहा २३ कपिरोमफला २४ गुप्ता २५ दुःस्पर्शा २६ अजडा २७ प्रावृषेण्या २८ वदरी २९ गुरुः ३० आर्षभी ३१ शिम्बी ३२ वराहिका ३३ तीक्ष्णा ३४ रोमालुः ३५ वनशूकरी ३६ कोशरोमा ३७ रोमवल्ली ३८ । शूकशिम्बिः ३९ वानरी ४० कपीकच्छुः ४१ शूकपिण्डी ४२ शूकपिण्डी ४३ कपिप्रभा ४४ । इति शब्दरत्नावली ॥ अस्या गुणाः । स्वादुरसत्वम् । शुक्रवृद्धिकारित्वम् । वातक्षयपित्तास्रविक्षतव्रणनाशित्वम् । शीतलत्वञ्च । तस्या वीजगुणौ । वातशमनत्वम् । परमवाजीकरत्वञ्च । इति राजनिर्घण्टः ॥ (शूकशिम्बीशब्देऽस्या विशेषस्तु ज्ञेयः ॥)

कपिकच्छुफलोपमा, स्त्री, (कपिकच्छुफलस्य उपमाच ।) जतुकालता । इति राजनिर्घण्टः ॥

कपिकच्छुरा, स्त्री, (कपिभ्यः कच्छुं कण्डूं राति ददाति । कपिकच्छु + रा + कः ।) कपिकच्छुः । इति शब्दमाला ॥ (यथा, गारुडे १९७ अध्याये ।
"शरपुङ्खशारिका पर्णी गुडूची कपिकच्छुरा ।
एषां दशपलान् भागान् क्वाथयेत् सलिलेऽमले" ॥)

कपिकन्दुकं, क्ली, (कपि + कदि + उकः । अतो लोपः । कस्य शिरसः पिकन्दुकं अस्थि । यद्वा कपिः परमात्मा विष्णुः कन्दति क्रीडति यत्र तत्तथं अस्थि ।) शिरोऽस्थि । इति शब्दचन्द्रिका । माथार खुलि इति भाषा ॥

कपिका, स्त्री, (कपिरिव कायति यद्वा वराहवत् नीलवर्णतया प्रकाशते शोभते वा । एकदेशसाम्यात् तथात्वम् ।) नीलसिन्दुवारवृक्षः । इति राजनिर्घण्टः ॥ (नीलसिन्दुवारशब्देऽस्या गुणादयो व्याख्येयाः ॥)

कपिकोलिः, पुं, (कपीनां प्रियः कोलिः ।) कोलिविशेषः । इति रत्नमाला । शेयाकुल इति भाषा ॥

कपिचूडा, स्त्री, (कपीनां चूडा इव । आम्रातकमुकुलस्य कपिचूडातुल्यत्वात् ।) आम्रातकवृक्षः । इति राजनिर्घण्टः । (आम्रातकशब्दे विशेषोऽस्या ज्ञेयः ॥)

कपिचूतः, पुं, (कपीनां चूत इव अत्यन्तप्रियत्वात् ।) आम्रातकवृक्षः । इति त्रिकाण्डशेषः ॥

कपिजः, पुं, (कपेः शिलायाः जायते । जन् + डः । कपितैलम् ॥) तुरुष्कः । इति राजनिर्घण्टः । शिलारस इति भाषा ॥

कपिजङ्घिका, स्त्री, (कपेः वानरस्य जङ्घा इव जङ्घा यस्याः । संज्ञायां कन् । कपिसदृशजङ्घाया दैर्घ्यात् इत्येवम् ।) तैलपिपीलिका । इति राजनिर्घण्टः ॥

कपिञ्जलः, पुं, (कपिरिव जवते वेगेन गच्छति यद्वा कम् श्रुतिसुखदं शब्दम् पिञ्जयति कपिवत् पिञ्जलो वा । ईषत्पिङ्गलवर्णो हरितालवर्णो वा । पृषोदरादित्वात् साधुः ।) चातकपक्षी । तन्मांसगुणाः । लघुत्वम् । शीतलत्वम् । कफरक्तपित्तनाशित्वम् । अग्निदातृत्वञ्च । इति राजवल्लभः ॥ पक्षिविशेषः । तत्पर्य्यायः । तैत्तलः २ ॥ तस्य मांसं शुक्रवृद्धिकरम् । इति राजनिर्घण्टः ॥ तित्तिरिपक्षी । इति त्रिकाण्डशेषः ॥ (यथा,—
"कपिञ्जल इति प्राच्यैः कथितो गौरतित्तिरः ।
कपिञ्जल इति ख्यातो लोके कपिशतित्तिरः" ॥
इति भावप्रकाशः ॥
"पित्तश्लेष्मविकारेषु सरक्तेषु कपिञ्जलाः ।
मन्दवातेषु शस्यन्ते शैत्यमाधुर्य्यलाघवात्" ॥
इति चरकः । तथा सुश्रुतश्च ।
"रक्तपित्तहरः शीतो लघुश्चापि कपिञ्जलः ।
कफोत्थेषु च रोगेषु मन्दवाते च शस्यते" ॥
ऋषिकुमारभेदः । अयन्तु श्वेतकेतुपुत्रस्य पुण्डरीकस्य बन्धुः । यथा कादम्बर्य्यां महाश्वेतोपाख्याने ।
"सखे ! कपिञ्जल ! किं मामन्यथा सम्भावयसि" ॥)

कपितैलं, क्ली, (कपिभिर्वानरैः शिलायाः विदारणात् सम्पादितं यत् तैलम् ।) तुरुष्कनामगन्धद्रव्यम् । इति भावप्रकाशः ॥ (तथाचोक्तम् ।
"सिह्लकस्तु तुरुष्कः स्याद्यतो यवनदेशजः ।
कपितैलञ्च सङ्ख्यातं तथा च कपिनामकः" ॥)

कपित्थः, पुं, (कपिः तिष्ठति फलप्रियत्वात् लोभाद् वा यत्र । कपि + स्था + कः । पृषोदरादित्वात् सलोपे साधुः ।) वृक्षविशेषः । कत्वेल इति भाषा । तत्पर्य्यायः । दधित्थः २ ग्राही ३ मन्मथः ४ दधिफलः ५ पुष्पफलः ६ दन्तशठः ७ । इत्यमरः । २ । ४ । २१ ॥ कपित्थः ८ । इति भरतः ॥ मालूरः ९ मङ्गल्यः १० नीलमल्लिका ११ ग्राहिफलः १२ चिरपाकी १३ ग्रन्थिफलः १४ कुचफलः १५ करभीष्टः १६ गन्धफलः १७ दन्तफलः १८ करभवल्लभः १९ काठिन्यफलः २० करञ्जफलकः २१ । अस्यामफलगुणाः । अम्लत्वम् । उष्णत्वम् । कफनाशित्वम् । ग्राहित्वम् । वायुवर्द्धकत्वम् । कण्ठरोगजिह्वाधिकजड़ताकारित्वम् । त्रिदोषवर्द्धकत्वम् । विषहरत्वम् । रोचकत्वञ्च । तत्पक्वफलगुणाः । दोषत्रयहरत्वम् । मधुराम्लरसत्वम् ।